# Bachelor of Commerce (B. Com.) Semester—II Examination
## SANSKRIT

समय: — होरात्रयम्] [गुणाङ्का: —80

**सूचना :—** विशेषनिर्देशाभावे स्वीकृतमाध्यमेन उत्तराणि लिखत।

1. (अ) अनुवादं कुरुत :— 5

आसीत् पुरा कोऽपि महातपा मुनि:। कदाचित् तच्छायोपविष्टस्य तस्योपरि बलाका एका विष्ठाम् उत्ससर्ज। स च क्रुद्ध: तां ददर्श। दृष्टमात्रा एव सा बलाका भस्मसादभूत्। ततश्च स मुनि: तप: प्रभावात् अहङ्कारम् आपद्यत्। एकदा असौ मुनि: क्वापि नगरे एकं ब्राह्मणमेत्य तद्गृहिणीं भिक्षाम् अयाचत। सा तु गृहिणी पतिव्रता प्रतीक्षस्व क्षणं यावत् भर्तु: परिचर्यां समापये इति तं निजगाद।

**अथवा**

नाविक:— अहो प्रक्षोभोऽद्य सागरस्य (सहसा कुतश्चिन शब्दं आकर्णयन्निव) किं व्रवीषि ? अद्य एवं अतिमात्रं प्रक्षुब्धे सागरे किमिति श्रीपादशिलां प्रति नौकां नयसि इति' अयि मुढे ! यदि तत्र अहं न गच्छामि तर्हि भगवती कन्याकुमारी मह्यं प्रकुप्येत्। सर्वथा दुरन्त: खलु देवतानां प्रकोप:। तद् अवश्यं गच्छामि। (तत: प्रविश्य सत्वरं नाविकपत्नी)

नाविकपत्नी:— (समुद्राभिमुखं धावन्तं तं सहसा आकृष्य) ननु भणामि प्रक्षुब्ध: अद्य सागर:।

(ब) अनुवादं कुरुत :— 5

स धन्यो विपदि स्वरूपं यो न मुञ्चति।
त्यजत्यर्ककरैस्तप्तं हिमो देहं न शीतताम्।।
बालस्यापि रवे: पादा: पतन्त्युपरि भूभृताम्।
तेजसा सह जातानां वय: कुत्रोपयुज्यते।।

**अथवा**

धत्ते भरं कुसुमपत्रफलावलीनां
धर्मव्यथां वहति शीतभवां रुजं च।
यो देहमर्पयति चान्यसुखस्य हेतो:
तस्मै वदान्यगुरवे तरवे नमोऽस्तु।।

2. ससन्दर्भं स्पष्टीकरणं लिखत :— 5

(अ) आगमदीपदृष्टेन खल्वध्वना सुखेन वर्तते लोकयात्रा।

**अथवा**

जन्मत्रये तद्करोत्पुरुष: पुराण:।

(ब) ससन्दर्भं स्पष्टीकरणं लिखत :— 5

हा! हा! हन्त तथापि जन्मविटपिक्रोडं मनो धावति।

**अथवा**

दुग्धं पश्यति मार्जारो न तथा लगुडाहतिम्।

3. कथां स्वशब्दैः लिखत :— 10

(अ) नाहं बलाका

**अथवा**

शालिवाहनकथा।

(ब) सारांशं लिखत :— 10

उपदेशामृतपत्रम्

**अथवा**

मम भारतं विजयते।

4. (अ) निम्नलिखितं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि **संस्कृतेन** लिखत :— 5

अथ राज्यश्रीः अपि नृत्यगीतादिषु कलासु प्रतिदिवसम् उपचीयमानपरिचया शनैः शनैः अवर्धत। परिमितैः एव दिवसैः यौवनम् आरुरोह। निपेतुः एकस्यां शरा इव लक्ष्यभुवि सर्वेषां दृष्टयः। दूतप्रेषणादिभिश्च तां ययाचिरे राजानः। कदाचित्तु राजा अन्तःपुरप्रासादस्थितः पार्श्वस्थितां महादेवीम् उत्सारितजनः जगाद। 'देवि', तरूणीभूता वत्सा राज्यश्रीः।

(1) राज्यश्री कासु कलासु परिचिता ?

(2) सा परिमितैः दिवसैः किम् आरुरोह ?

(3) तस्यां केषां दृष्टयः निपेतुः ?

(4) राजानः तां कथं ययाचिरे ?

(5) राजा महादेवीं किं जगाद ?

(ब) निम्नलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि **संस्कृतेन** लिखत :— 5

गङ्गाधरो द्विजसुतामुदुवाह सुलक्षणाम्।
सुशीलां पार्वतीनाम्नीं सुमुहूर्तं यथाविधि।।
स्वप्ने ब्राह्मणवेषेण सूर्यस्तस्यै वरं ददौ।
प्राप्नुयास्तनयं वत्से वर्षान्ते मम संनिभम्।।
गङ्गाधरः सुतं लब्ध्वा व्यतरच्छर्करां तदा।
द्विजज्ञातिवयस्येषु रत्नागिरिनिवासिषु।।

(1) गङ्गाधरः काम् उदुवाह ?

(2) तस्याः नाम किम् आसीत् ?

(3) स्वप्ने तस्यै कः वरं ददौ ?

(4) स्वप्ने तस्यै कः वरः प्राप्तः ?

(5) गङ्गाधरः सुतं लब्ध्वा किम् अकरोत् ?

5. टिप्पणीः लिखत :—

(अ) (1) श्रीहर्षः

(2) विष्णुशर्मा। 10

(ब) (1) आर्यभट्टः

(2) वराहमिहिरः। 10

(क) (i) अनुरूपं योजयत :— 5

| अ | ब |
|---|---|
| (1) आर्यभट्टः | बृहत्संहिता |
| (2) वराहमिहिरः | सिद्धान्तशिरोमणिः |
| (3) श्रीनीलकण्ठदीक्षितः | पायसंकल्पना (3.14) |
| (4) डॉ. श्री. भा. वर्णेकरः | विडम्बनकाव्यम् |
| (5) भास्कराचार्यद्वितीयः | शिवराज्याभिषेकम् |

(ii) उचितैः पर्यायैः रिक्तस्थानानि पूरयत :— 5

(1) _______ नैषधीयचरितम् इति महाकाव्यं रचितवान्। (माघः श्रीहर्षः)

(2) _______ इति नाटकं शूद्रकेन लिखितम्। (मुद्राराक्षसम्, मृच्छकटिकम्)

(3) विष्णुशर्मणा _______ इति नीतिकथासंग्रहः रचितः। (हितोपदेशः पञ्चतन्त्रम्)

(4) गङ्गालहरी इति स्तोत्रकाव्यं _______ रचितम्। (नीलकण्ठादीक्षितेन, जगन्नाथपण्डितेन)

(5) _______ महोदयेन संस्कृतेन ग्रामगीतानुवादः कृतः।(अम्बिकादत्तव्यास, डॉ. श्री भा. वर्णेकर)